न तस्याः कालदोषेण परिणामो नरर्षभ ! ।
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम् ॥
शक्तिर्भगवतः सा हि तदेकपरमा च सा ।
इत्युक्तः प्रलयो राजन् ! विश्वस्यास्य महामते ! ॥
यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा ॥"
इति पाद्मे स्वर्गखण्डे ३९ अध्यायः ॥
(सात्त्विकविकारान्तर्गतविकारविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ३।१६७ ।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥")

प्रलापः, पुं, (प्रलपनमिति । प्र + लप् + भावे घञ् ।) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयोजनमुन्मत्तादिवचनम् । इत्यमरभरतौ । १ । ६ । १५ ॥ रोगाणामुपसर्गोऽयम् ॥ ( यथा, भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
स्वहेतुकुपिताद्वातादसम्बद्धनिरर्थकम् ।
वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताम्भोदतिक्ता
नलदतुरगगन्धा भारती हारहूरा ।
मलयजदशमूलीशङ्खपुष्पी सुपक्वा
प्रलपनमपहन्युः पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पपटः नलदसुशीरं भारती ब्राह्मी हारहूरा द्राक्षा ।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥ )

प्रलापहा, [न्] पुं, (प्रलापं हन्तीति । हन् + क्विप् ।) कुलत्थाञ्जनम् । इति राजनिर्घण्टः ॥

प्रलीनता, स्त्री, ( प्रलीनस्य निश्चेष्टस्य भावः । प्रलीन + तल् ।) प्रलयः । तत्पर्य्यायः । इन्द्रियस्वापः २ चेष्टानाशः ३ । इति राजनिर्घण्टः ॥

प्रलेहः, पुं (प्रलिह्यते इति । प्र + लिह् + घञ् ।) व्यञ्जनविशेषः । इति पाकराजेश्वरः । दम्पोखत कोरमा इत्यादि पारस्यभाषा ॥)चिन्तामणौ घृत प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च वारिणा ।
तप्तस्नेहे विनिक्षिप्य दर्व्या सञ्चालयन् पचेत् ॥
तप्तं तत्र विनिःक्षिप्य लावणं जलमल्पकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेद्दाड़िमीनीरं बहुलेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका ॥
ततश्चोत्तार्य्य तन्मांसं पृथक् कुर्य्यात् प्रलेहतः ।
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना घृतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"हिङ्ग्वार्द्रं बीजपूरैलालवणैः सम्भृतेन तु ।
कुट्टितामिषपिष्टेन तच्च दाड़िमबीजतः ॥
शोषणावेसवारश्च प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिदो बल्यः कफानिलरुजापहः ।
सग्राही पित्तकृत् किञ्चिच्छिलाध्मानगदान् जयेत् ॥"
पूर्णप्रलेहस्तु ।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च ।
स्विन्नं कृत्तं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विज्ञेयो वातनाशनः ।
अशान्तिकारकश्चैव सुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याकहिङ्गुभृद्दधिसंयुते ।
वस्त्रपूतेऽहंसम्पर्कं स्विन्नं मांसं विनिःक्षिपेत् ॥"
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तस्नेहे क्षिपेद्धिङ्गुसंयुक्तं कासमर्दकम ।
धान्यकं लवणाजाजीधौतं मांसञ्च तत् क्षिपेत्
ततोऽर्द्धस्फुटिते मांसे दाड़िमीबीजसंयुते ।
सम्यक्के चातिमृदुले तक्रं शुण्ठीञ्च निःक्षिपेत् ॥
तत उत्तार्य्य वस्त्रेण गालयेद्धुपयेदपि ।
रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिःक्षिपेत् ॥
करमर्द्दं दाड़िमस्य स्थाने शेषन्तु पूर्व्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाकासमर्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुष्कप्रलेहवत् ॥
सिद्धे च गालयेद्वस्त्रे कृत्वा वर्णप्रयोजनम् ।
ताम्बूलं कष्टजङ्गारं देयं हरितहेतुना ॥
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका सूक्ष्मा वेसवारेण संयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रविम्बीफलाकारं लड्डुकावटकादिकम् ।
शृङ्गाटकफलाकारं यथाबुद्धिप्रकारजम् ॥
कृत्वा हि बहुधाधारे स्वेदितं घृतभार्ज्जितम् ।
सवेसवारजे तक्रे क्वथिते च मनोरमे ॥
निःक्षिप्य चालयेदीषदुत्तार्य्यैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषमुद्गप्रलेहकः ॥
प्रलेहो वातजिद्बल्यः शुक्रमांसप्रदो रसः ।
प्रीणनः प्राणयुक्तानां यकृदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
आदौ तैले परं पक्वं सर्व्वमन्यत्तु पूर्व्ववत् ॥
वर्णस्य करणे देयं पूर्व्वोक्तं द्रव्यकं हि यत् ।
उद्वूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम्
तप्ततैले क्षिपेत् खण्डं हिङ्गुसैन्धवमिश्रितम् ।
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥"

प्रवक्ता, [ ऋ ] त्रि, प्रकर्षेण वक्ति यः ( प्र + वच् + तृच् । ) वेदादिवाचकः । यथा,—
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
इति मत्स्ये ७ अध्यायः ॥

प्रवचनं, क्ली,(प्रकर्षेण उच्यते इति । प्र + वच + ल्युट् वेदः । (यथा, अमरकोषे । २।७।१० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते ॥"
वेदाङ्गम् । यथा, मनुः । २ । १८४ ।
"अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि तेषु अग्र्याः षड़ङ्गविदः ।" इति तत्र कुल्लूकभट्टः ॥ तथा च हरिवंशे । १६७ । ६८ ।
"उवाच वेदांश्चतुरो मन्त्रप्रवचनार्च्चितान् ॥"*
प्रकृष्टं वचनमिति कर्म्मधारयः । प्रकृष्टवाक्यम् । इति मेदिनी । ने, १९१ ॥ ( यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि,(प्रवक्तीति । प्र + वच् + "भव्यगेयप्रवचनीयेति ।" ३।४।६८ । इति कर्त्तरि अनीयर् ।) प्रवक्ता । (प्रोच्यते इति । प्र + वच् कर्म्मणि अनीयर । ) प्रवाच्यः । इति मेदिनी ये १३२ ।

प्रवणः, पुं, ( प्रवन्ते गच्छन्ति जना अनेनेति प्रु गतौ + करणे ल्युट् ) चतुष्पथः इत्यमरः ३।३।५६ ।

प्रवणः, त्रि,(प्रवतेऽत्रेति । प्रु + अधिकरणे ल्युट क्रमनिम्नभूमिः । ( यथा, मनुः । ३ । २०६ ।
"दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ॥"
उदरम् । प्रह्वः । इति मेदिनी ।ने,५९॥ (यथा, मार्कण्डेये । २३ । ८९ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")
आयतः । प्रगुणः । अनः । इति विश्वः ॥
द्रुतः । स्निग्धः । इति शब्दरत्नावली ॥
आसक्तः । इति हेमचन्द्रः । ३।४९ ॥ ( यथा, विष्णुपुराणे । ६ । १ । ११ ।
"प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ! ॥")
क्षीणः इति धरणिः ।

प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः । कप् । ) नायिकाभेदः । अस्या लक्षणम् । यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यत्येव सा अस्याश्चेष्टा । काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसन्तापसम्मोहनिश्वासवाष्पादयः ॥ मुग्धा प्रवत्स्यत्पतिका यथा,—
"प्राणेश्वरे किमपि जल्पति निर्गमाय
दामोदरी वदनमानमयाञ्चकार ।
आली पुनर्निभृतमेत्य लतानिकुञ्ज-
मुन्मत्तकोकिलकलध्वनिमाततान ॥ १ ॥